**अश्विनी** स्त्री अश्वस्तदुत्तमाङ्गाकारोऽस्त्यस्य इनि ङीप्। सप्तविंशतिधाविभक्तराशिचक्रस्य प्रथमे भागे। अस्यास्तथाकारत्वमस्लेषाशब्दे उक्तम्। "अश्विनीमघमूलानां गण्डा आद्यास्त्रिनाड़िकाः" ज्यो० नक्षत्रपरत्वे न०। "पुष्याश्विहस्ता लघुः" ज्यो० अश्वाया आकारोऽस्त्यस्याः इनि ङीप्। हयरूपधारिण्यां त्वष्टृसुतायां २सवितुर्भार्य्यायामरुणात्मजशब्दे २६८ पृ० विवृतिः।

**अश्विनीकुमार** पु० द्वि०व०। सूर्य्येण त्वष्टृसुतायां संज्ञायां बड़वारूपायामुत्पादितयोः स्वर्वैद्ययोः तदुत्पत्तिकथा भा० आ०प० ६६ अध्याये अश्विनीतनयपुत्रसुतादयोऽप्यत्र। अरुणात्मजशब्दे २६८ पृ० विवरणम्।

**अश्वीय** न० अश्वानां समूहः छ। १हयसमूहे। अश्वस्य हितम् अपूपा० छ। २हयहिते। पक्षे यत्। अश्व्योऽप्युक्तार्थे।

**अश्वीरस** न० अश्वानामुर इव मुख्यम् अच्समा०। मुख्ये हये।

**अष** दीप्तौ अक० गतौ, ग्रहणे च सक० भ्वा० उभ० सेट्। अषति ते आषीत् आषिष्ट।

**अषडक्षीण** त्रि० न सन्ति षड़क्षीणि श्रोत्रेन्द्रियाणि ग्राहकाणि यत्र ख। तृतीयजनकर्णाश्रुते द्वाभ्यामेव कृते मन्त्रादौ।

**अषाढ**(षाड़) पु० अषाढ(षाड़)या युक्ता पौर्णमासी आषाढी (षाड़ी)सा यत्र मासे अण् वा ह्रस्वः। वैशाखादितस्तृतीये चान्द्राषाढ(ड)मासे। आषाढी पूर्णिमा प्रयोजनमस्य प्रयोजनार्थे अण्। २ब्रह्मचारिधार्य्ये दण्डे, तस्य हि आषाढपौर्णमास्यां विहितकर्म्मोपयोगित्वात् तथात्वम् पृ० ह्रस्वः। अषाढोऽप्युभयत्र। स्वार्थे कन् तत्रैव। सह क्त वेदेऽोत्त्वाभावः षत्वञ्च न०त०। असोढ़े त्रि० "अषाढ़ं युत्सु पृतनासु पप्रिम्" यजु० ३४,२०। "अषाढाय सहमानाय वेधसे" ऋ० २,२१,२।

**अषाढा**(ड़ा) स्त्री षाढिः साहनं सह–णिच्+क्तिन् ढत्वम् अर्श आद्यच् न०त० पृषो० वा षत्वं डत्वञ्च। अश्विन्यवधिके पूर्व्वादिके विंशे, उत्तरादिके एकविंशे च नक्षत्रे।

**अष्टक** न० अष्टौ अध्यायाः परिमाणमस्य अष्टन्+कन्। १पाणिनेरष्टाध्यायीसूत्रे, प्रत्येकमष्टाध्यायात्मके २ऋग्वेदांशभेदे च ३अष्टसंख्यापरिमिते त्रि० "पैशुन्यं साहसं द्रोहर्ष्या सूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनुः। "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु" पा० उक्तेः ३अष्टाष्टस्याध्ययनेऽपि। अष्टकं विदन्ति अधीयते वा "सूत्राच्च कोपधात्" पा० अध्येतृवेदितृप्रत्ययस्य बाहुल्ये लुक्। अष्टकाः पाणिनेः ४सूत्राध्यायिषु ब०व०। ५अष्टसंख्यायाम् "ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः" तन्त्रम्। गङ्गाष्टकं पठति यः प्रयतः प्रभाते" वाल्मी०। [द्विकर्णत्वात्तथात्वम्।

**अष्टकर्ण** पु० अष्टौ कर्णा अस्य। चतुर्मुखे ब्रह्मणि प्रतिमुखं

**अष्टकर्म्मन्** अष्टौ कर्म्माण्यस्य। "आदाने च विसर्गे च तथा प्रैषनिषेधयोः। पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे। दण्डशुद्ध्योः सदा रक्तस्तेनाष्टगतिकोन्नृपः" उशनसोक्ताष्टविधकर्म्मयुक्ते नृपतौ "अष्टकर्म्मा दिवं याति राजा शक्राभिपूजितः" उश०। अष्टगतिकोऽप्यत्र "तत्रादानं करादीनाम्। विसर्गो भृत्यादिभ्यो धनदानम् प्रैषोऽमात्यादीनां दृष्टादृष्टानुष्ठानेषु। निषेधो दृष्टादृष्टविरुद्धक्रियासु। अर्थवचनं कार्य्यसन्देहेन राजाज्ञयैव तत्र नियमनम्। व्यवहारेक्षणं प्रजानामृणादिविप्रतिपत्तौ। दण्डः पराजितानां शास्त्रोक्तधनग्रहणम्। शुद्धिः पापे कर्म्मणि जाते तत्र प्रायश्चित्तसम्पादनमिति" कुल्लूकभट्टः। मेधातिथिस्तु। अकृतारम्भः। कृतानुष्ठानम्। अनुष्ठितविशेषणम्। कर्म्मफलसंग्रहः। तथा सामदानभेददण्डाः। एतदष्टविधं कर्मेत्याह। अथवा "कृषिः वणिक्पथः। उदकसेतुबन्धनम्। दुर्गकरणम् कृतस्य संस्कारः निर्णयः। हस्तिबन्धनम्। खनिखननम्। सैन्यनिवेशनम्। दारुणवनच्छेदनञ्चेत्यप्याह"। तन्मूलन्तु अष्टवर्गशब्दे वक्ष्यते।

**अष्टका** स्त्री अश्नन्ति पितरोऽस्यां तिथौ अश–तकन्। "अष्टका पितृदैवत्ये" इत्यजादिपाठात् न इत्त्वम्। "अष्टका तु समाख्याता सप्तम्यादिदिनत्रयम्" इत्युक्तलक्षणे १सप्तम्यादिदिनत्रये, २दिनत्रयसाध्ये कर्मभेदे च तच्चाश्वलायन सू० दर्शितम् तदपि पौषमाघफाल्गुनानां कृष्णसप्तम्यादिषु कर्त्तव्यं तत्र प्रधानमष्टमी, सप्तम्यामारम्भः अष्टम्यां कृत्यं नवम्यामन्यष्टकेति भेदः। "अमावास्या चतुर्द्दश्योः पौर्णमास्यष्टकासु च" "अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु" इति च मनुः तच्च न पितृमात्रदैवत्यम् अन्यदैवत्यमपि यथाह "पितृप्रदानाय मूले स्युरष्टकास्तिस्र एव च। कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री हि भाष्यते। प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी। आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा। शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः वायु० पुरा०। मूले प्रधानस्थाने अमावस्या हि श्राद्धस्य प्रधानं कालः तद्वदिति